**अदायाद** त्रि॰ दायं पित्रादिधनं सम्बन्धितया अदन्ति भुञ्जते अद–अण् ६त॰ न॰त॰ । सम्बन्धिधनाग्राहके पतितादि सपिण्डभेदे । "अदायादाश्च परिगणितमात्रादिभिन्नाः स्त्रियः, "अदायाश्च स्त्रियोमताः" इति स्मृतेः । द्वादशविधान् पुत्रानुक्त्वा "कानीनश्च सहोढश्च क्रीतः पौनर्भवस्तथा । स्वयंदत्तश्च शौद्रश्च षडदायादबान्धवा इति मनूक्ताः कानीनादयश्च वेदितव्याः तथा विभागानार्हा अपि क्लीवादयोऽदायादा इत्यवसरे वाच्यम् । सपिण्डभिन्ने च ।

**अदायिक** त्रि॰ दायमर्हन्ति दाय+ठक्–न॰ब॰ । दायादशून्ये "अदायिकं राजगामीति" स्मृतिः दायग्राहकपुत्रादिशून्यं तदर्थः ।

**अदाह्य** त्रि॰ न दग्धुमर्हति दह–अर्हार्थे ण्यत् न॰त॰ । शास्त्रोक्तविधिना अग्निसंस्कारानर्हे पतितादौ ते च स्मृतौ दर्शिता यथा । "शृङ्गिदंष्ट्रिनखिव्यालविषवह्निस्त्रिया जलैः । आदरात् परिहर्त्तव्यः कुर्वन् क्रीड़ां मृतस्तु यः । नागानां विप्रियं कुर्वन् दग्धश्चाप्यथ विद्युता । निगृहीतः स्वयं राज्ञा चौर्य्यदोषेण कुत्रचित् । परदारान् रमन्तश्च द्वेषात्तत्पतिभिर्हताः । असमानैश्च संकीर्णैश्चाण्डालाद्यैश्च विग्रहम् । कृत्वा तैर्निहता ये तु चाण्डालादीन् समाश्रिताः । गराग्निविषदाश्चैव पाषण्डाः क्रूरबुद्धयः । क्रोधात् प्रायं विषं वह्निं शस्त्रमुद्बन्धनं जलम् । गिरिवृक्षप्रपातञ्च ये कुर्वन्ति नराधमाः । कुशिल्पजीविनश्चैव सूनालङ्कारकारिणः । मुखेभगाश्च ये केचित् क्लीवप्राया नपुंसकाः । ब्रह्मदण्डहता ये च ये च वै ब्राह्मणैर्हताः । महापातकिनोये च पतितास्ते प्रकीर्त्तिताः । पतितानां न दाहः स्यान्नान्त्येष्टिर्नास्थिसञ्चयः । नचाश्रुपातः पिण्डं वा कार्य्यं श्राद्धादिकं क्वचित् । एतानि पतितानाञ्च यः करोति विमोहितः । तप्तकृच्छ्रद्वयेनैव तस्य शुद्धिर्न चान्यथा" इति । दग्धुमशक्ये निरवयवत्वात् परमात्मनि । "नैनं छिन्दन्ति शस्त्राणि नैनं दहति पावक" इत्युपक्रमय "अच्छेद्योऽयमदाह्योऽयमक्लेद्योऽशोष्यएव चेति" गीतायां तस्यादाह्यत्वोक्तेस्तथात्वम् ।

**अदिति** स्त्री न दीयते खण्ड्यते दृढत्वात् दो–क्तिच् न॰त॰ । दातुं छेत्तुं न योग्यायां पृथिव्याम् "चक्षुरदितावसनमिति" ता॰ब्रा॰ "अदितौ पृथिव्यामिति" भाष्यम् । वाचि निरुक्त॰ । दितिर्दनुजमाता विरोधार्थे न॰त॰ । तद्विरोधिन्यां देवमातरि "प्रजज्ञिरे महाभागा दक्षकन्यास्त्रयोदश । अदितिर्दितिर्दनुःकाला दनायुः सिंहिका तथा । क्रोधा प्राधा च विश्वा च विनता कपिला मुनिः । कद्रूश्च मनुजव्याघ्र ! दक्षकन्यैव भारतेति" भारतम् आदिप॰ । एता एव कश्यपाय दक्षेण दत्ता यथोक्तं तत्रैव "दक्षस्त्वजायताङ्गुष्ठाद्दक्षिणाद्भगवानृषिः ब्रह्मणः पृथिवीपाल ! शान्तात्मा सुमहातपाः । वामादजायताङ्गुष्ठाद्भार्य्या तस्य महात्मनः । तस्यां पञ्चाशतं कन्याः स एवाजनयत् प्रभुः । ददौ स दश धर्म्माय सप्तविंशतिमिन्दवे । दिव्येन विधिना देव ! कश्यपाय त्रयोदशेति" अदितिरदीना देवमातेति निरु॰ । तद्देवताके पुनर्वसुनक्षत्रे । अत्ति प्राणिजातम् अद–इतिच् । सर्वनाशके मृत्यौ, परमेश्वरे च पु॰ । "स यद्यदेवासृजत तत्तदत्तुमध्रियत सर्वं वा अत्तीति तददितेरदितित्वम्, सर्वस्यैतस्यात्ता भवति सर्वमस्यान्नं भवति य एवमेतददितेरदितित्वं वेदे"ति बृ॰उ॰ दितिः खण्डनम् । तच्छून्ये अखण्डे । "क्षत्रियासि यज्ञियास्यदितिरसीति" यजु॰ "अदितिरखण्डितेति" वेददीपः ।

**अदितिज** पु॰ अदितेर्जायते जन–ड । देवे । "द्वादशैवादितेः पुत्राः शक्रमुख्याः नराधिप ! । तेषामवरजो विष्णुर्यत्र लोकाः प्रतिष्ठिता इति" भारतम् द्वादश आदित्याः शक्रादयः शक्रमुख्याश्च देवाश्चेत्यर्थः ।

**अदितिनन्दन** पु॰ ६त॰ । देवे अदितिसुतादयोऽप्यत्र ।

**अदीन** त्रि॰ दी–क्त न॰त॰ । अकातरे कातर्य्यरहिते ।

**अदुष्ट** त्रि॰ न॰त॰ । स्मृत्युक्तदुरदृष्टसाधनतारूपदोषरहिते । "अदुष्टा सन्तता धारा" इति स्मृतिः "दुष्टानि च दुष्टशब्दे वक्ष्यन्ते ।

**अदूर** न॰ न॰त॰ । दूरत्वविरोधिसामीप्ये "अदूरे जगदम्बायाः शारदीयो महोत्सव" इति पुरा॰ । तद्वति त्रि॰ । "परस्पराक्षिसादृश्यमदूरोज्झितवर्त्मस्विति" रघुः ।

**अदूषित** त्रि॰ न॰त॰ । दूषितभिन्ने स्मृत्युक्ते दोषानर्हे द्रव्यभेदे च । दूषितञ्च अस्पृश्यस्पर्शवत्त्वेन, पर्य्युषितत्वेन, विरसत्वेन, दोषजनकादृष्टविशेषहेतुत्वेन च स्मृत्यादौ दुष्टत्वेन कीर्त्तितम् तस्यैव क्वचिद्विषये प्रतिप्रसवः स्मृतावुक्तस्तादृशपदार्थएवादूषितम् । दूषितविवरणं दुष्टशब्दे वक्ष्यते ।

**अदृश्** त्रि॰ नास्ति दृक् दृष्टिरस्य । अन्धे चक्षुरिन्द्रियशून्ये । न पश्यति दृश–कर्त्तरि क्विप् न॰त॰ । अदर्शके त्रि॰ ।

**अदृश्य** त्रि॰ न॰त॰ । दृश्यभिन्ने । न द्रष्टुमर्हति । दर्शनानर्हे, परमेश्वरे च । "यत्तदद्रेश्यमविज्ञेयमग्राह्यमिति" श्रुतिः ।

**अदृष्ट** न॰ दृश–क्त न॰त॰ । पुण्यापुण्यरूपे भाग्ये,